M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 779

Title: Prayoga Ratna

779

प्रयोगरत्नः

		Prayoga Ratna	Title
		Nārāyana Bhatta	Author
			Editor
			Year, Vols.
			Publisher
779			Remarks

श्रीगणेशाय नमः ॥ हरिः ॐ ॥ अथ ॥ श्रीयेकचित्समर्थो ॥ श्रीरमंस
परिवारं गणेशं च सरस्वतीं ॥ आश्वलायनतासिद्धं व्यानप्रण
म्यपि तत्सगुरू ॥ १ ॥ भट्टरामेश्वरः सूनो भट्टनारायणः सुधीः
प्रयोगरत्नं कुरुते काश्यपादि च तुष्टये ॥ २ ॥ ग्रंथेस्मिन्गुणग
णकत्वमुच्यते चेत्स्वग्रंथं गुणगणकत्वमाह कोन ॥ तत्संतः श्री
रसिस्रतांज्जलिस्तु याचे छोध्यं तः सदसद्विहोच्यते मयायत्त ॥
॥ ३ ॥ न मामिपार्वतीसूनुं भक्तानां सिद्धिदायकं ॥ क्रीयते ह्युपका
रायेस्मार्तानुष्ठानपद्धतिः ॥ ४ ॥ दीक्षितानां तविज्ञेन विश्वेना
थस्य सूनुना ॥ प्रयोगोरत्न्ये ते सम्यक् मंत्रविस्तारपुर्वकं ॥ ५ ॥
श्वलायनशाखेऽस्मिन्संतिपह्यः चरानां ॥ विनापुस्तकमो

कर्मकर्त्तुंनशक्यते ॥ ६ ॥ तदर्थंक्रियतेयत्नःपाठबोधहितायच ॥
लभोपायसिध्यर्थंवैदिकानांतदुच्यते ॥ ७ ॥ पंचविंशतिसंस्कारैःसं
स्कृतायद्विजातयः ॥ तेपवित्राश्चयोग्याःस्युःश्राद्धादिषुसुयंत्रिताः ॥
॥ ८ ॥ गर्भाधानंपुंसवनंसीमंतोबलिरेवच ॥ जातकृत्यंनामक
र्मनिष्क्रमोन्नप्राशनंपरं ॥ ९ ॥ चौलकर्मोपनयनंव्रतानांचचतुष्ट
यं ॥ श्रावण्यामश्वयुज्यांचमार्गशीर्ष्यांचपार्वणं ॥ १० ॥ उत्सर्गश्चो
पाकर्ममहायज्ञाश्चनित्यशः ॥ संस्कारानियताह्येतेब्राह्म
णस्यविशेषतेति ॥ ११ ॥ अथस्वस्तिवाचनम् ॥ स्वस्तिवाचयते ॥
स्नानोद्वाहंचाग्रयणंमहत्कार्यंयथातथा ॥ धर्मकर्मणिमांगल्ये २
संग्रामेद्भुतदर्शने ॥ १२ ॥ गृह्यपरिशिष्टे ॥ अथस्वस्तिवाचनंक

भरि

द्धिपूर्तेषु ॥ वृद्धिर्विवाहांता आपत्यसंस्काराः ॥ ॥ प्रवेशोद्यापनंपू
र्तंतत्कर्मणिश्राद्यंतयोः कुर्यादिति ॥ आश्वलायनस्मृतिः ॥ ॥
इतिशौनकः ॥ ॥ वैदिकेतांत्रिकेचादौततःपुण्याहमिष्यतेयातुः ॥
॥ पुण्याहवाचनविधिंवक्ष्यामोऽथयथाविधिः ॥ प्रायेद्युःकर्मणा
यादावंतेनोचोदयसिद्धयेइति ॥ तच्चकर्मप्रयोगांतर्गतमिति के
चित् ॥ वहवस्तुप्रयोगबहिर्भूतमिति ॥ आद्यपक्षेकर्मप्रयोग
संकल्पंकृत्वाकार्यं ॥ द्वितीयेतुतत्कृत्वाकर्मसंकल्पः ॥ अथकिं
चित्संक्षेपेणप्रयोगमात्रमुच्यते ॥ श्री ॥ यजमानःकृताभ्यंगादिः
स्वलंकृतोदर्भपाणिःशुचिर्भूत्वामंगलसंभारसंभृतस्वलंकृ
तेगृहेगोमयेनोपलिप्यसभूमौसोत्तरच्छदंभद्रासनेउदङ्मुखो

नाए०

३ उपविश्यरंगवल्लिकायुक्तभूमंडलेपश्चपुरिमितस्यचास्यांनूतन
याधान्यस्योपरिदक्षिणोत्तरयोःसुवर्णरजतमताम्रमृण्मयान्य
तमकलशद्वयमव्रणमनोहरमखंडितंशुद्धजलपूरितंसफ
लंनिधायसूत्रवेष्टितोत्तरकलशेपंचरत्नानिनिक्षिप्यतदुपरि
सितवतंडुलपूरितंसफलंसपल्लवंपात्रंनिधायतत्राग्निमदेवोप्र
ज्ञास्तावेगतिवचनसमर्थान्तद्दिनेश्राद्धादिष्वभुक्तवंतोनिषि
द्धप्रतिग्रहनिवृत्तान्शुचीन्सोत्तरीयान्दर्भपवित्रपाणि
न्युग्मान्ब्राह्मणान्प्राङ्मुखानासनेषूपविश्यगंधपुष्पादिभि
रभ्यर्च्ययथाचारं॥छ॥सुमुखश्चैकदंतश्चकपिलोगजकर्णक॥ ३
लंबोदरश्चविकटोविघ्ननाशोगणाधिपाः॥धूमकेतुर्गणा

भटि

ध्यक्षोभालचंद्रोगजाननः॥द्वादशैतानिनामानियःपठेच्छृणुयादपि॥
॥विद्यारंभेविवाहेचप्रवेशेनिर्गमेतथा॥संग्रामेसंकटेचैवविघ्नस्त
स्यनजायते॥शुक्लांबरधरंदेवंशशिवर्णंचतुर्भुजं॥प्रसन्नवद
नंध्यायेत्सर्वविघ्नोपशांतये॥अभीप्सितार्थसिध्यर्थंपूजितो
यःसुरासुरैः॥सर्वविघ्नहरेतस्मैश्रीगणाधिपतयेनमः॥सर्वमंग
लमांगल्येशिवेसर्वार्थसाधिके॥शरण्येत्र्यंबकेगौरिनारायणि
नमोस्तुते॥सर्वदासर्वकार्येषुनास्तितेषाममंगलं॥येषांहृदि
स्थोभगवान्मंगलायतनोहरिः॥तदेवलग्नंसुदिनंतदे
वताराबलंचंद्रबलंतदेव॥विद्याबलंदैवबलंतदेवलक्ष्मी

४ तेंतेंघ्रियुगंस्मराम्नि॥ यत्रयोगीश्वरः कृष्णोयत्रपार्थोधनुर्धरः॥ तत्रश्री
र्विजयोभूतिर्ध्रुवानीतिर्मतिर्मम॥ सर्वेष्वारंभकार्येषुत्रयस्त्रिभुव
नेश्वरः॥ देवादिशंतुनःसिद्धिंब्रह्मेशानजनार्दनः॥ लक्ष्मीनारायणा
भ्यांनमः॥ उमामहेश्वराभ्यांनमः॥ शचीपुरंदराभ्यांनमः॥ माता
पितृभ्यांनमः॥ इष्टदेवताकुलदेवताभ्योनमः॥ सर्वेभ्योब्राह्मणे
भ्योनमोनमः॥ श्री॥ ॥ आचम्यप्राणानायम्यदेशकालौसंकीर्त्य
॥ विष्णुः त्रिः॥ श्रीमद्भगवतोमहापुरुषस्यविष्णोराज्ञयाप्रवर्तमा
नस्य अद्यब्रह्मणःद्वितीयप्रहरार्द्धे श्रीश्वेतवाराहकल्पेवैव
स्वतमनवंतरे आष्टाविंशतितमेकलियुगप्रथमचरणेभ ४

भरि

रतवर्षेभरतखंडेजंबुद्वीपेदण्डकारण्येदेशे अमुकतीर्थे अमुक
तीरे अमुकदेवताश्रमेरामक्षेत्रे अस्मिन्वर्तमाने अमुक
संवत्सरे अमुकायने अमुकऋतौ अमुकमासे अमुकपक्षे अमु
कतिथौ अमुकवारे अमुकदिवसनक्षत्रे अमुकराशिस्थित
चंद्रे अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थितेदेवगुरौ
शेषेषुग्रहेषुयथाराशिस्थानस्थितेषुसत्सु एवंगुणवि
शेषणविशिष्टायांशुभपुण्यतिथौ अमुककर्मकरिष्ये॥ तदंग
स्वस्तिपुण्याहवाचनंमातृकापूजनंनांदिश्राद्धंचकरिष्ये॥ तत्रा
दौनिर्विघ्नतासिध्यर्थंगणपतिपूजनंचकरिष्ये॥ गणा

नी०र०

५ ना त्वा गत्स म दो गणाधिपतिर्ज्ञगाति ।। गणपत्यावाहने विनियोग
गः ।। ॐ गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रव
स्तमं ।। ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सी
द सादनं ।। ऋद्धिबुद्धिसहितं गणपतिमावाहयामि ।। गणपत
ये नमः ।। आसनपाद्यमार्घ्यमाचमनीयस्नानमाचमनीयव
स्त्रयज्ञोपवीतगंधसौभाग्यद्रव्यपुष्पधूपदीपनैवेद्यमाचम
नीयफलतांबुलं समर्पयामि ।। कृयाः पूजायाः षाद्गुण्यार्थे
यथाशक्ति दक्षिणां समर्पयामि ।। गणानां त्वा कृव ।। १ ।। नि
षुसीद गणपते गणेषु त्वामाहुर्विप्रतमं कवीनां ।। न ऋते ५

भ०दि

त्वक्रियते किंचनारे महामर्कंमघवंचित्रमर्च ।। गणपतये नमः ।। मंत्रपुष्पांजलिं समर्पया
मि ।। मंत्रहीनं क्रियाहीनं भक्तीहीनं सुरेश्वर ।। यत्पूजितं मया देव परिपूर्णं तद
स्तु मे ।। १ ।। वक्रतुंड महाकाय कोटिसूर्यसमप्रभ ।। निर्विघ्नं कुरु मे देव सर्वकार्ये
षु सर्वदा ।। १ ।। श्री ।। ॐ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षतां ।। पिपृतां नो भरी
मभिः ।। ओषधयः संवदंते सोमेन सह राज्ञा ।। यस्मै कृणोति ब्राह्मणस्तं राजन्पार
यामसि ।। आकलशेषु धावति पवित्रे परिषिच्यते ।। उक्थैर्यज्ञेषु वर्धते ।। इमं मे गं
गे यमुने सरस्वति शुतुद्रिस्तोमं सचता परुष्ण्या ।। असि । क्न्या मरुद्वृधे वि
तस्तयार्जीकिये शृणुह्या सुषोमया ।। गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं ।।
।। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रीयं ।। या ओषधीः पूर्वा जाता देवेभ्यस्त्रि
युगं पुरा ।। मनै नु बभ्रुणामहं शतं धामानि सप्त च ।। कां उ त्कां उ रास रो

ना.ग.

६ हंति परुषः परुषः परि ॥ एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥ अ
श्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ॥ गोभाज इत्किलासथ यत्स
नवथ पूरुषं ॥ स्योना पृथिवी भवा नृक्षरा निवेशनी ॥ यच्छा नः शर्म
सप्रथः ॥ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ॥ बृहस्प
ति प्रसूतास्ता नो मुंचंत्वंहसः ॥ स हि रत्नानि दाशुषे सुवाति सविता भगः ॥
॥ तं भागं चित्रमीमहे ॥ हिरण्यरूपः स हिरण्यसंदृगपां नपात्सेदु हिरण्य
वर्णः ॥ हिरण्ययात्परि योनेर्निषद्या हिरण्यदा ददत्यन्नमस्मै ॥ युवा सु
वासाः परिवीत आगात्स उ श्रेयान्भवति जायमानः ॥ तं धीरासः क
वय उन्नयंति स्वाध्यो मनसा देवयंतः ॥ पूर्णा दर्वि परापत सुपू
र्णा पुनरापत ॥ वस्नेव विक्रीणावहा इषमूर्जं शतक्रतो ॥ तत्त्वा ६

भटि

यामि ब्रह्मणा वंदमानस्तदाशास्ते यजमानो हविर्भिः ॥ अहेळमानो व
रुणेह बोध्युरुशंस मा न आयुः प्रमोषीः ॥ उत्तरकलशे ॐ वरुणाय नमः ॥
आवाहयामि ॥ वरुणं आसनादिमंत्रपुष्पांजलैः संपूज्य ॥ पुण्याहवाचने चैव
यः कुर्यात्कलशार्चनं ॥ दक्षिणस्थः स्थिरश्चैव उत्तरस्थश्चरस्तथा ॥ १ ॥ न चा
लयेद्दक्षिणस्थोत्तरस्थस्तु चालयेत् ॥ अथान्ये धर्महानिः स्याद्देवधर्म
सनातनः ॥ २ ॥ कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः ॥ मूले तत्र स्थि
तो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुंधरा ॥ ऋ
ग्वेदोथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥ अंगैश्च सहिताः सर्वे कलशांबु समा
श्रिताः ॥ अत्र गायत्री सावित्री शांतिः पुष्टिकरी तथा ॥ आयांतु देवपूजार्थं दुरि
तक्षयकारिकाः ॥ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ॥ आयांतु मम शांत्य

थं दुरितक्षयकारकाः॥ मातृदेवो भव॥ पितृदेवो भव॥ आचार्यदेवो भव॥
अतिथिदेवो भव॥ ततः आशिषः प्रार्थयंते॥ ससाक्षता आशिषः संतु॥ अ
वनिकृतजानुमंडलः कमलमुकुलसदृशमंजलीं शिरस्याधाय दक्षिणेन
पाणिना सुवर्णपूर्णकलशं धारयित्वा दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णु
पदानि च तेनायुःप्रमाणेन पुण्याहं दीर्घमायुरस्तु॥ सौमनस्यमस्तु॥ शि
वा आपः संतु॥ अक्षतं चारिष्टं चास्तु॥ गंधाः पांतु सुमंगल्यं चास्तु॥ अक्ष
ताः पांतु आयुष्यमस्तु॥ पुष्पाणि पांतु सौश्रियमस्तु॥ तांबूलानि पांतु ऐश्व
र्यमस्तु॥ दक्षिणाः पांतु बहुदेयं चास्तु॥ दीर्घमायुः शांतिः पुष्टिस्तुष्टिश्चा
स्तु॥ श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रं चायुष्यं चास्तु॥ यं कृत्वा सर्ववेदय
ज्ञक्रियाकरणकर्मारंभाः शुभाः शोभनाः प्रवर्तंते॥ तमहमोंकारमा

दिं कृत्वा॥ ऋग्यजुःसामाथर्वाशीर्वचनं बहुऋषिमतं संविज्ञातं भवद्भिरनुज्ञा
तः पुण्याहं वाचयिष्ये॥ वाच्यतां॥ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमा
क्षभिर्यजत्राः॥ स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदा
युः॥ द्रविणोदा द्रविणसस्तुरस्य द्रविणोदाः सनरस्य प्रयंसत्॥ द्रविणोदा वीर
वतीमिषं नो द्रविणोदा रासते दीर्घमायुः॥ सविता पश्चातात्सविता पुरस्तात्स
वितोत्तरात्तात्सविताधरात्तात्॥ सविता नः सुवतु दीर्घमायुः॥ नवो नवो भ
वति जायमानोह्नां केतुरुषसामेत्यग्रं॥ भागं देवेभ्यो विदधात्यायन्प्रचंद्रमा
स्तिरते दीर्घमायुः॥ उच्चा दिवि दक्षिणावंतो अस्थुर्ये अश्वदाः सह ते
सूर्येण॥ हिरण्यदा अमृतत्वं भजंते वासोदाः सोम प्रतिरंत आयुः॥ आ
पउदंतु जीवसे दीर्घायुत्वाय वर्चसे॥ यस्त्वा हृदा कीरिणा मन्यमानोम

नारा०

८ र्यमर्त्यो जोहवीमि॥ जातवेदो यदेण अस्मासु धेहि प्रजाभिरग्ने अमृतत्व
मस्यां॥ यस्मै त्वं सुकृते जातवेद उलोकमग्ने कृणवः स्योनं॥ अश्विनं
स पुत्रिणं वीरवंतं गोमंतं रयिं नशते स्वस्ति॥ सं त्वा सिंचामि यजुषा
प्रजामायुर्धनं च॥ व्रतनियमतपस्वाध्यायक्रतुदमनदानविशि
ष्टानां॥ ब्राह्मणानां मनः समाधीयतां॥ समाहितमनसस्मः प्रसीदंतु
भवंतः॥ प्रसन्नाः स्मः॥ शांतिरस्तु॥ पुष्टिरस्तु॥ तुष्टिरस्तु॥ वृद्धिर
स्तु॥ अविघ्नमस्तु॥ आयुष्यमस्तु॥ आरोग्यमस्तु॥ शिवं कर्मास्तु॥
कर्मसमृद्धिरस्तु॥ वेदसमृद्धिरस्तु॥ शास्त्रसमृद्धिरस्तु॥ पुत्रसमृद्धिर
स्तु॥ धनधान्यसमृद्धिरस्तु॥ इष्टसंपदस्तु॥ अरिष्टनिरसनम ८

भा०

स्तु॥ यत्पापं तत्प्रतिहतमस्तु॥ यच्छ्रेयस्तदस्तु॥ उत्तरे कर्मण्यविघ्नमस्तु॥ उत्त
रोत्तरमहरहरभिवृद्धिरस्तु॥ उत्तरोत्तराः क्रियाः शुभाः शोभनाः संपद्यंतां॥
तिथिकरणमुहूर्तनक्षत्रसंपदस्तु॥ तिथिकरणमुहूर्तनक्षत्रग्रहलग्नादि
देवताः प्रीयंतां॥ तिथिकरणे मुहूर्ते नक्षत्रे सग्रहे सदैवते प्रीयेतां॥
अग्निपुरोगा विश्वेदेवाः प्रीयंतां॥ इंद्रपुरोगा मरुद्गणाः प्रीयंतां॥
ब्रह्मपुरोगाः सर्वे वेदाः प्रीयंतां॥ विष्णुपुरोगाः सर्वे देवाः प्रीयंतां॥ माहे
श्वरीपुरोगा उमामातरः प्रीयंतां॥ वसिष्ठपुरोगा ऋषिगणाः प्रीयं
तां॥ अरुंधतीपुरोगा एकपत्न्यः प्रीयंतां॥ ऋषयश्छंदांस्याचार्या वेदा
देवा यज्ञाश्च प्रीयंतां॥ ब्रह्म च ब्राह्मणाश्च प्रीयंतां॥ श्रीसरस्वत्यौ प्रीयेतां॥
श्रद्धामेधे प्रीयेतां॥ भगवती कात्यायनी प्रीयतां॥ भगवती माहेश्वरी

नाश०

१ भगवती माहेश्वरी प्रीयतां॥ भगवती पुष्टिकरी प्रीयतां॥ भगवती तुष्टिक
री प्रीयतां॥ भगवत्यृद्धिकरी प्रीयतां॥ भगवती वृद्धिकरी प्रीयतां॥ भगवंतौ
विघ्नविनायकौ प्रीयेतां॥ भगवान्स्वामी महासेनः सपत्नीकः ससुतः सपा
र्षदः सर्वस्थानगतः प्रीयतां॥ हरिहरहिरण्यगर्भाः प्रीयंतां॥ सर्वग्राम
देवताः प्रीयंतां॥ सर्वाः कुलदेवताः प्रीयंतां॥ बहिः॥ हता ब्रह्मद्विषः॥ हताः प
रिपंथिनः॥ हता अस्य कर्मणो विघ्नकर्तारः॥ शत्रवः पराभवं यांतु॥ शाम्यं
तु घोराणि॥ शाम्यंतु पापानि॥ शाम्यंत्वीतयः॥ शुभानि वर्द्धंतां॥
शिवा आपः संतु॥ शिवा ऋतवः संतु॥ शिवा अग्नयः संतु॥ शिवा
आहुतयः संतु॥ शिवा ओषधयः संतु॥ शिवा वनस्पतयः संतु॥ शिवा
अतिथयः संतु॥ अहोरात्रे शिवे स्यातां॥ निकामे निकामे नः पर्जन्यो व १

भटि

र्षतु॥ फलवत्यो न ओषधयः पच्यंतां॥ योगक्षेमो नः कल्पतां॥ शुक्रांगा
रकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहित आदित्यपुरोगाः स
र्वे ग्रहाः प्रीयंतां॥ भगवान्नारायणः प्रीयतां॥ भगवान्पर्जन्यः प्रीय
तां॥ भगवान्स्वामी महासेनः पुण्याहकालान्वाचयिष्ये॥ वाच्यतां॥
ॐ उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंससि॥ वृषेव
वाजी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमा वद विश्वतो नः श
कुने पुण्यमा वद॥ याज्याया यजंति पत्यैया [illegible] पुण्येयं च लक्ष्मीः पु
ण्यामेव तं लक्ष्मीं संभावयति पुण्यां लक्ष्मीं संस्कुरुते [illegible] यत्पुण्यं नक्षत्रं
॥ तद्बृहत्कुर्वीतोपव्युषं॥ यदा वै सूर्य उदेति॥ अथ नक्षत्रमेति॥ याव

ति तत्र सूर्यो गच्छेत्॥ पच जघन्य पश्येत्॥ तावत्कुर्वीत यत्कारी स्यात्॥
पुण्याह एव कुर्वीत॥ तानि वा एतानि॥ यमनक्षत्राणि॥ यान्येव देवनक्ष
त्राणि॥ तेषु कुर्वीत यत्कारी स्यात्॥ पुण्याह एव कुर्वीत॥ महसंसह कुटुंबि
ने महाजनान्नमस्कुर्वाणायाशीर्वचनमपेक्षमाणाय॥ अद्य करि
ष्यमान अमुककर्मणः पुण्याहं भवंतो ब्रुवंतु॥ इति त्रिर्वदेत्॥ मं
त्रमध्योच्चनिस्वनैः॥ तथैव अ ॐ पुण्याहमिति त्रिर्विप्राः॥ ॐ स्व
स्तये वायुमुपब्रवामहे सोमं स्वस्ति भुवनस्य यस्पतिः॥ बृहस्पतिं सर्व
गणं स्वस्तये स्वस्तय आदित्यासो भवंतु नः॥ आदित्य उदयनीयः प
थ्येवेत्तः स्वस्त्याप्रयंति पथ्यं स्वस्तिमभ्युद्यंति स्वस्त्येवेतः प्रयंति स्व

स्त्युद्यंति स्वस्त्युद्यंति॥ ॐ स्वस्ति न इंद्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्वे
दाः॥ स्वस्त्यस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥ अ
दितेर्देवा वसवः सोम्यासः॥ चतस्रो देवीरजराः श्रविष्ठाः॥ ते यज्ञं
पुरजसः पुरस्तात्॥ संवत्सरीणममृतं स्वस्ति॥ मखमित्या वि
कर्मण्यल्यपूर्वयत्॥ स्वस्तिं भवंतो ब्रुवंत्विति त्रिः॥ आयुष्मते स्वस्तीति
प्रतिवचनं त्रिः॥ अ ॐ ऋध्याम स्तोमं सनुयाम वाजमा नो मंत्रं सर
थेहोपयातं॥ यशो न पक्वं मधु गोष्वंतरा भूतांशो अश्विनोः काममप्राः॥
॥सर्वामृद्धिमृध्यामिति तं चेत्ते जसे वपुरस्तास्य ये भूयछंदोभिर्म
त्यतोन्से रे रूपरिष्टाद्यायास्य वर्शोद्वादश्वाहं परिभूत्स सर्वामृद्धि

नाग्र०

११ माध्नोत्सर्वामृद्धिमृध्नोतिय एवंवेद॥ ऋध्यास्मै हव्यैर्नमसोपसद्य।
मित्रं देवं मित्रधेयं नो अस्तु॥ अनुराधान्हविषा वर्द्धयंतः॥ शतं जी
वेमः शरदः सवीराः॥ त्रीणि त्रीणि वै देवानामृ[illegible]नि॥ त्रीणि छंदां
सि त्रीणि सवनानि॥ त्रय इमे लोकाः॥ ऋध्यामेवैतद्वीर्य एषु लोकेषु प्रति
तिष्ठति॥ मह्यमित्यादि पूर्ववत्॥ अस्य कर्मण ऋद्धिं भवंतो ब्रुवंतु
॥ इति त्रिः॥ ऋध्यतामिति त्रीः॥ ॐ श्रियेजातः श्रिय आनिरियाय
श्रियं वयो जरितृभ्यो दधाति॥ श्रियं वसाना अमृतत्वमायन् भव
न्ति सत्यास्समिथा मितद्रौ॥ श्रिय एवैनं तच्छ्रियामादधाति संततम् ११
ऋचावषट्कृत्यं संतत्यै संधीयते प्रजया पशुभिर्य एवं वेद॥ यस्मि

भरि

न्तथान्विवः॥ ब्रह्मणा सहिताः सर्वे दिक्पालाः पांतु ते सदा॥ ३॥ की
र्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः॥ बुद्धिर्लज्जा वपुः शां
तिः कांतिस्तुष्टिश्च मातरः॥ ४॥ एतास्त्वामभिषिंचंतु देवपत्न्यः समा
गताः॥ आदित्यश्चंद्रमा भौमो बुधजीव सितार्कजाः॥ ५॥ ग्रहास्त्वा
मभिषिंचंतु राहुः केतुश्च तर्पिताः॥ देवदानवगंधर्वा यक्षराक्षस
पन्नगाः॥ ६॥ ऋषयो मुनयो गावो देवमातर एव च॥ देवपत्न्यो द्रुमा
नागा दैत्याश्चाप्सरसां गणाः॥ ७॥ अस्त्राणि सर्वशस्त्राणि राजानो वा
हनानि च॥ औषधानि च रत्नानि कालस्यावयवाश्च ये॥ ८॥ सरितः
सागराः शैलास्तीर्थानि जलदा नदाः॥ एते त्वामभिषिंचंतु सर्वकामा

थसिद्धये॥ ॐ तच्छंयोरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतये दै
वी स्वस्तिरस्तु नः॥ स्वस्तिर्मानुषेभ्यः॥ ॐ ऊर्ध्वं जिगातु भेषजं शं नो अ
स्तु द्विपदे शं चतुष्पदे॥ ॐ नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथि
व्यै नम ओषधीभ्यः॥ नमो वाचे नमो वाचस्पतये नमो विष्णवे महते क
रोमि॥ ॐ भूर्भुवः स्वः॥ अमृताभिषेकोऽस्तु॥ ॥ ततः आचारप्राप्तं व
स्त्रादिदानं तत्सन्निधानं॥ युवं वस्त्राणि पीवसा वसाथे युवोरच्छिद्रा म
न्तवो ह सर्गाः॥ अवातिरतमनृतानि विश्व ऋतेन मित्रावरुणा सचे
थे॥ ॥ एवं स्वस्तिवाचनं कृत्वा मातृकाः पूजयेत्॥ गौरी पद्मा श
ची मेधा सावित्री विजया जया। देवसेना स्वधा स्वाहा मातरो लो

के मातरः॥ धृतिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवताः॥
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा॥ वाराही च तथेन्द्रा
णी चामुण्डाः सप्त मातरः॥ गौर्यादि षोडशमातृः ब्राह्म्यादि सप्तमा
तॄं आवाहयामि॥ तन्नस्तु मित्रावरुणा तदुग्रं शं योरस्मभ्यमिदम
स्तु शस्तं॥ ॐ श्रीमहीं गाधमुत्तमप्रतिष्ठां नमो दिवे बृहते साधना
य॥ गृहा वै प्रतिष्ठा सूक्तं तत्प्रतिष्ठिततमया वाचा शंस्तव्यं तस्मा
द्यपि दूर इव पशून्लभेत गृहानेवैनानाजिगमिषति गृहा हि प
शूनां प्रतिष्ठा प्रतिष्ठा॥ सुप्रतिष्ठितमस्तु॥ गौर्यादिषोडशमात
भ्यो नमः॥ ब्राह्म्यादिसप्तमातृभ्यो नमः॥ आवाहयामि आसनपा

१६ द्यं॥ मार्घ्यं॥ माचमनीयं॥ स्नानं माचमनीयं वस्त्रं मा॥ भरणं चंदनं सौ
भाग्य द्रव्याणि॥ पुष्पाणि॥ धूपं दीपं॥ नैवेद्यं माचमनीयं॥ तांबूल
दक्षिणां॥ गोरिर्मिमायसलिलानि तक्षत्य[illegible]दी द्विपदी सा चतुष्प
दी॥ अष्टापदी नवपदीव भूवुषी सहस्राक्षरा परमेव्योमन्॥ मंत्र
पुष्पांजलिं समर्पयामि॥ ॥ ततो नांदीश्राद्धं कुर्यात्॥ ॥ अ
थ तत्रापसव्या नांतु अनुलोम्येन मात्रादि[illegible]क्रमेणैव आश्वला
लायनाचार्यवचनात्॥ ॥ सत्यवसुसंज्ञका विश्वे देवाः नांदिमु
खाः भूर्भुवःस्वः इदं वः पाद्यं स्वाहा न मम॥ मातृपितामहिप्रपि १६
तामह्यः॥ नांदिमुखाः भूर्भुवः स्वः इदं वः पाद्यं स्वाहा न मम।

पितृपितामहप्रपितामहाः नांदिमुखाः भूर्भुवःस्वः इदं वः पाद्यं स्वाहा
न मम॥ मातामह मातुः पितामह मातुः प्रपितामहाः पत्नीसहिताः नां
दिमुखाः भूर्भुवस्वः इदं वः पाद्यं स्वाहा न ममः॥ सत्यवसुसंज्ञकाः वि
श्वेदेवाः नांदिमुखाः भूर्भुवःस्वः रिदं मासनगंधाद्युपचारकल्पनं स्वा
स्वाहा न मम॥ मातृपितामहिप्रपितामह्यः नांदिमुखाः भूर्भुवःस्वः
स्वः रिदं०॥ पितृपितामहप्रपितामहाः नांदिमुखाः भूर्भुवःस्वः
रिदं०॥ मातामहमातुःपितामहमातुःप्रपितामहाः पत्नीसहिताः
नांदिमुखाः भूर्भुवःस्वः इदं आ०॥ ॥ सत्य वसुसंज्ञकाः विश्वे
देवाः नांदिमुखाः भूर्भुवःस्वः [illegible]० वः सुगम ब्राह्मण भो

ना॰ग्र॰

१७ जनपरियाधं दास्यमानमन्नंयथाशक्तिसोपस्करं स्वाहा नमम॥मा
तपितामहीप्रपितामह्यः॥ नांदिमुखाः भूर्भुवःस्वः वःयुग्मब्राह्म
ण०॥पीतृपितामहीप्रपितामहाः नांदिमुखाः भूर्भुवःस्वःवःयुग्म
ब्राह्मण०॥मातामहमातुःपितामहमातुःप्रपितामहाःपत्नीस
हिताः नांदिमुखाः भूर्भुवःस्वःवःयुग्मब्राह्मणभो० जनप०॥
गौर्यादिषोडशमातरः ब्राह्म्यादिसप्तमातरः भूर्भुवःस्वःवःयु
ग्मब्राह्मणभो०॥ नममेयंवृद्धिः॥ ॐ उपास्मैगायतानरःपवमाना
येंदवे॥अभिदेवांइयक्षते॥ अभितेमधुनापयोथर्वाणोऽअ १७
श्रिश्रयुः॥देवंदेवायदेवयु॥ सनःपवस्वशंगवेशंजनायशम

भरि

र्वते॥शंराजन्नोषधीभ्यः॥ बभ्रवेनुःस्वतवसेऽरुणायदिविस्पृशे॥
सोमायगाथमर्चता॥हस्तच्युतेभिरद्रिभिःसुतंसोमंपुनीतना॥मे
मधावाधावतामधु॥अस्नमीमदंतह्यवप्रियाअधूषता॥अ
स्तोषतस्वभानवोविप्रानविष्टयामतीयोजान्विंद्रतेहरी॥तत
स्यनांदीश्राद्धस्यप्रतिष्ठासिध्यर्थं द्राक्षामलकनिष्क्रयणीं दक्षिणां
दातुमहमुत्सृज्ये॥प्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरिता
बभूव॥यत्कामास्तेजुहुमस्तन्नोअस्तुवयंस्यामपतयोरयीणां
॥अनेननांदीश्राद्धेननांदीमुखदेवताःप्रीयंतांवृद्धिः॥ भ॰१
मातापितामहीचैवतथैवप्रपितामही॥पितापितामहश्चैव

१८ तथैवप्रपितामहः ॥ मातामहस्तत्पिताच प्रमातामहकादयः ॥ एते
भवंतुसुप्रीताः प्रयच्छंतुचमंगलं ॥ २ ॥ ॥ ॐ इच्छामग्नेपुरूदंस
सनिंगोः शश्वत्तमंहवमानायसाधा ॥ स्यान्नः सूनुस्तनयोविजावा
ग्नेसातेसुमतिर्भूत्वस्मे ॥ शिवं शिवं शिवं ॥ अनेन कर्मणा नांदि
मुखदेवताः प्रीयंतां वृद्धिः ॥ ॥ श्रीगोपालायनमः ॥ श्री ॥ इतिपुण
ण्याहवाचननांदीश्राद्धप्रयोगः समाप्तः ॥ श्री ॥ अथविस्तारेण
नांदिश्राद्धं लिख्यते ॥ श्री ॥ तच्चपार्वणवत् ॥ विशेषो लिख्यते ॥
पूर्वाह्णे वैश्वदेवतंत्रेण कुर्यात् ॥ कर्ताप्राङ्मुख उपवीती तिल १८
स्थाने यवैः कुर्यात् ॥ उपचाराः प्रदक्षिणः ॥ युग्मान्ब्राह्मणानत्र

वैश्वदेवार्थं द्वौ पित्रादिभ्यस्तु प्रत्येकं द्वौ द्वौ ॥ ६ ॥ वर्गस्य वा द्वौ द्वौ र्दने
चस्नानद्रव्यैः कृतस्नानाः कार्याः ॥ ऋजवो दर्भाः समूलाग्राः गंधादी
नां द्विर्द्विदानं विदानं वेचकुलिपं कर्षूणीप्रयोगे न कार्यः ॥ प्रथमाप्रयो
गः कार्यः ॥ चतुर्थीप्रयोगोपि क्वचित् ॥ मधुरंभोजनं दद्या चाम्लं ॥
रक्तपुष्पाणि च वर्ज्यानि ॥ संबंधनामरूपाणि कश्चिद्वर्ज्यानि ॥ सव्यजा
नु नि ॥ आचम्य प्राणानायम्य देशकालौ संकीर्त्यामुककर्मांगभूतं नां
दीश्राद्धं करिष्ये ॥ समस्तसंपद्दितिब्राह्मणान्प्रार्थयेत् ॥ सत्य
व्यवसुसंज्ञका विश्वेदेवाः ॥ नांदीमुखाः भूर्भुवः स्वः स्थाने क्षणं द
त्वा भवद्भिः प्रसादः कर्तव्यः ॥ मातृपितामहीप्रपितामह्यः ॥ नांदि

मुखाः भूर्भुवः स्वः स्थाने॰॥ पितृपितामहप्रपितामहाः नांदिमुखाः भू
र्भुवः स्वः स्थाने॰॥ मातामहमातुःपितामहमातुःप्रपितामहाः पत्नीसहिताः
नांदिमुखाः भूर्भुवस्वः स्थाने॰॥ ततश्चतुरस्रं पाद्यार्थं मंडलद्वयं कृत्वा
॥ सत्यवसुसंज्ञकाः विश्वेदेवाः ॥ स्वागतं ॥ नमोस्त्वनंताय॰॥ गंधादिभि
रभ्यर्च्य ॥ सत्यवसुसंज्ञकाः ॥ विश्वेदेवाः नांदीमुखाः भूर्भुवः स्वः ॥ इ
दं वः पाद्यं स्वाहा न मम ॥ मितियवोदकं विप्रद्वयपादेषु द्विवारं क्षिप
त् ॥ ततः पूर्ववत्स्वागतवचनाद्यभ्यर्चनांतं कृत्वा ॥ पितृपितामह
प्रपितामहाः नांदिमुखाः भूर्भुवः स्वः इदं वः पाद्यं स्वाहा न ममेति जलं
क्षिपेत् ॥ वंवं पूर्ववत् एवं पितृवर्गेपि ॥ सपत्निकमातामहवर्गयोः पा

द्यं दत्वा ॥ द्वौ द्वौ विप्रौ प्राङ्मुखौ उपवेश्य ॥ उपक्रांतं नांदीश्राद्धकर्म करि
ष्ये ॥ देवे हस्तोदकं दत्वा ॥ स्रुक्चंदनैर्दर्भैरासनं दक्षिणतो दत्वा आ
पादत्वा ॥ प्राप्नुवतां भवंती श्राद्धे देवे क्षणः क्रियतामिति कर्ता वदेत् ॥
विप्राः ॐ तथा ॥ प्राप्नुवतां भवंतौ ॥ विप्रौ ॥ प्राप्नुवावः ॥ कर्ता यवै
रर्चयेत् आर्घ्यपात्राणि प्राक्संस्थानि निक्षिप्य । तत्र जलमापूर्य
यवोसीति मंत्रेण देवपात्रेयवान्विकीर्य गंधपुष्पाणि क्षिप्त्वा विश्वे
देवास आगत शृणुता म इमं हवं एदं बर्हिर्निषीदत । विश्वेदेवाः
शृणुतेमं हवं मे ये अंतरिक्षे य उपद्यविष्ठ ये अग्निजिह्वा उत वा य
जत्रा आसद्यास्मिन्बर्हिषि मादयध्वं इति मंत्रद्वयेन मूर्द्धादिपादप

२० र्यत्नं यवैरर्चयेत्॥ आगच्छंतु महाभागा विश्वेदेवा महाबलाः॥ येत्र
विहिता श्राद्धे सावधाना भवंतु ते॥ इति मंत्रेण प्रार्थयेत्॥ देवपात्रे संप
न्नं॥ सुसंपन्नं॥ स्वाहार्घ्यो॥ अस्तु स्वाहा॥ इति प्रतिवचनं देयं॥ सत्यवसु
संज्ञकाः विश्वेदेवाः इदं वो अर्घ्यं स्वाहा न ममेति सकृदर्घ्यदानं कृत्वा॥
ततो गंधपुष्पधूपदीपाच्छादनादि दत्वा॥ ततो पितृसकृदर्घ्यं ततो मा
तादिभ्यः ऋजुदर्भैर्दक्षिणतोप्राग्वदासनं परिकल्प्य प्राक्संस्थार्घ्यपात्रेषु अ
प आसिंच शंनोदेवीरित्यनुमंत्र्याय यवोसि सोमदेवत्यो गोसवे देवनिर्मि
तः॥ प्रत्नवद्भिः प्रत्तः पुष्ट्या नांदीमुखान् पितॄन् इमान् प्रीणयाहि नः स्वाहा नम
मः॥ इति प्रतिपात्रे यवान्निक्षिप्य अन्यत्पूर्ववदर्घ्यदानादि कृत्वा॥ नांदीमु २०

खा मातर इदं वो अर्घ्यमिति सकृदर्घ्यदानं॥ अन्येभ्योप्येवमेवमर्घ्यदानं द
द्यात्॥ मंत्रस्याहः प्रतिब्राह्मणं मंत्रावृत्तिः॥ यादिव्या आपः पृथिवी सं
बभूवुर्या अंतरिक्ष्या उत पार्थिवीर्याः॥ हिरण्यवर्णा यज्ञियास्ता न
आपः स्योना भवंतु॥ गंधादीनि द्विर्द्विर्दत्वा पाणिहोमं तं समानका
र्यं॥ तत्र विशेषः॥ अग्नये कव्यवाहनाय स्वाहा॥ सोमाय पितृमते स्वा
हा॥ अन्येषामपि पाणिषु द्वे द्वे आहुती हुत्वा॥ अन्नेषु परिविष्टेषु हुत
शिष्टं दद्यात्तच्च॥ ततो गायत्र्या जलमभ्युक्ष्य॥ पृथिवी ते पात्रं
द्यौरपिधानं ब्राह्मणस्य त्वा मुखे जुहोमि ब्राह्मणानां त्वा प्राणापानयोर्जुहोमि
अक्षितमसि मैषां क्षेष्ठा अमुत्रामुष्मिं लोके इदं विष्णुर्विचक्रमे त्रेधा

निरुधेपदं ॥ समूल्लमस्यपांसुरे ॥ विश्वाहव्यं रक्षस्य ब्रह्मणां गुरु मूलेन त
त्पात्रं ब्राह्मणाय निवेद्य ॥ इदमन्नं परिविष्टं परिवेक्ष्यमाणं च आतृप्तेः
स्वाहा न मम इति जलं क्षिपेत् ॥ ये यासोदिव्येकादश स्थ पृथिव्याम ध्ये
कादशस्था ॥ आप्सुक्षितो महिनैकादशास्थ देवासो यज्ञमिमं जुष
ध्वं इति संप्रार्थ्य ॥ ततो मातृवर्गेभ्यः पितृवर्गेभ्यः सपत्नीकमातृ
महवर्गेभ्यः यथालिंगं अंगुष्ठादिनिवेशनादि सर्वं कुर्यात् ॥ प्रजाप
ते न त्वदेतान्य० ॥ रयिणामिति अनेन मंत्रेण नांदीमुखदेवताभ्यः
प्रीयंतां न मम इति जलमुत्सृजेत् ॥ ब्राह्मणास्तु बलिदानं चेज्जे भुंजीत २१
न च पितृसूक्तं न जपेत् ॥ रक्षोघ्नानैंद्रान् जपेत् ॥ तृप्तिप्रश्नांतं सम भटि

नं ॥ तत्र विशेषः ॥ मधु वाता ऋचं स्थाने उपास्मै गायता नर इति पंच
ऋच अक्षन्नमीमदन्तेति चात्र नांदीश्राद्धं संपन्न स्थाने देवे रु
चिरमिति तृप्तिप्रश्नं ॥ तथैव वर्गत्रयस्य रुचिरमिति स्पृष्ट्वा ते पित
थैव ब्रूयुः ॥ पिंडदानां तं समानं ॥ तत्र विशेषः ॥ आचांतेषु विप्रेषु
गोमयोपलिप्ते युक्ता भाजनस्थले प्रागग्रान् दर्भानास्तीर्य दधिसंमि
श्रां अयमिश्रं बदरीफलमिश्रं च भुक्तशेषमन्नं गृहीत्वा उपरि तनं त
गु कृत्वा ॥ नांदीमुखेभ्यो मातृभ्यः स्वाहेति एकं पिंडं दत्वा ॥ द्विति
तीयं तूष्णीं दद्यात् ॥ एवं प्रत्येकं द्वौ द्वौ पिंडौ निर्वपेत् ॥ पिंडदाने
कुलदेशाचारतो व्यवस्था भविष्यपुराणे ॥ पिंडनिर्वपणं कुर्यान्न

२२ राधिप ॥ वृद्धीश्राद्धे महाबाहो कुलधर्माननवेक्षतु ॥ पित्र्यानुमंत्र
णादि वैकल्पिकं पिंडपात्रमधोमुखं न कुर्यात् ॥ एतन्स्यनांदीश्रा
द्धस्य प्रतिष्ठासिध्यर्थं द्राक्षामलकनिष्क्रयभूतं द्रव्यं दातुमुत्सृजे
त् ॥ ॐ स्वाहेति विसृजेत् ॥ तथैव ब्राह्मणा ॐ स्वाहेति प्रतिब्रूयुः ॥ त
तो वरयाचनं कुर्यात् ॥ दातारो नोभिवर्द्धंतां वेदाः संततिरेव चः ॥ श्र
द्धा च नो मा व्यगमद्बहुदेयं च नोस्तु ॥ अन्नं च नो बहु भवेदतिथींश्च
लभेमहि ॥ याचितारश्च नः संतु मा च याचिष्म किंचन ॥ तथैव ब्राह्मणा
ब्रूयुः ॥ ततः माता पितामही चैव तथैव प्रपितामही ॥ पिता पितामह
श्चैव तथैव प्रपितामहाः ॥ १ ॥ मातामहस्तत्पिता च प्रमातामहकादय २२

भटि

यः ॥ एते भवंतु सुप्रीताः प्रयच्छंतु हि मंगलं ॥ २ ॥ इति ॥ इहैव स्तमा
वियोष्टं विश्वमायुर्व्यश्नुतं ॥ क्रीडंतौ पुत्रैर्नप्तृभिर्मोदमानौ
स्वे गृहे ॥ इति ब्राह्मणेनाशीषो देयः ॥ यथाचारं सर्वं कुर्यात् ॥
ततो मातृका विसर्जयेत् ॥ जीवन्मातृकस्य न मातृकपार्वणं
जीवन्मातामहस्य न मातामहपार्वणं ॥ द्वारलोपात् ॥ जीवत्पि
तृकस्तु येभ्यः पिता दद्यादित्युक्तमेव ॥ विप्राणामुच्छिष्टानि आयंब
हिर्न उद्वासयेत् ॥ ततः स्वस्ति नो मिमितामश्विना भगः स्वस्ति दे
व्यदितिरनर्वणः ॥ स्वस्ति पूषा ऽसुरो दधातु नः स्वस्ति द्यावापृथ
वी सुचेतुना ॥ स्वस्तये वायुमुपब्रवामहै सोमं स्वस्ति भुवनस्य य

स्पतिः बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवंतु नः
विश्वे देवा नो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये देवा अ
व्त्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वंहसः स्वस्ति नो मित्रावरुणा
स्वस्ति पथ्ये रेवति स्वस्ति न इंद्रश्चाग्निश्च स्वस्ति नो अदिते कृधि
स्वस्ति पंथामनुचरेम सूर्याचंद्रमसाविव। पुनर्ददताघ्नता
जानता संगमेमहि स्वस्त्ययनं तार्क्ष्यमरिष्टनेमिं महद्भुतं
वायसं देवतानां असुरघ्नमिंद्रसखं समत्सु बृहद्यशो नाव
मिवारुहेम अंहोमुचमांगिरसं गयं च स्वस्त्यात्रेयं मनसा
च तार्क्ष्यं प्रयतपाणिः शरणं प्रपद्ये स्वस्ति संबाधेष्वभयं

नो अस्तु॥ ७॥ शं न इंद्राग्नी भवतामवोभिः शं न इंद्रावरुणा रातह
व्या। शमिंद्रासोमा सुविताय शं योः शं न इंद्रापूषणा वाजसातौ॥ शं
नो भगः शमु नः शंसो अस्तु शं नः पुरंधिः शमु संतु रायः॥ शं नः स
त्यस्य सुयमस्य शंसः शं नो अर्यमा पुरुजातो अस्तु॥ शं नो धाता
शमु धर्ता नो अस्तु शं न उरूची भवतु स्वधाभिः॥ शं रोदसी बृह
ती शं नो अद्रिः शं नो देवानां सुहवानि संतु॥ शं नो अग्निर्ज्योतिरनी
को अस्तु शं नो मित्रावरुणावश्विना शं॥ शं नः सुकृतां सुकृतानि सं
तु शं न इषिरो अभि वातु वातः॥ शं नो द्यावापृथिवी पूर्वहूतौ श
मंतरिक्षं दृशये नो अस्तु॥ शं न ओषधीर्वनिनो भवंतु शं नो

२७ रजसस्पतिरस्तु जिष्णुः ॥१॥ शं न इंद्रो वसुभिर्देवो अस्तु शमादि
त्येभिर्वरुणः सुशंसः ॥ शं नो रुद्रो रुद्रेभिर्जलाषः शं नस्त्वष्टा ग्नाभि
रिह शृणोतु ॥ शं नः सोमो भवतु ब्रह्म शं नः शं नो ग्रावाणः शमु सं
तु यज्ञाः ॥ शं नः स्वरूणां मितयो भवंतु शं नः प्रस्व१ शम्वस्तु वेदिः ॥
शं नः सूर्य उरुचक्षा उदेतु शं नश्चतस्रः प्रदिशो भवंतु ॥ शं नः पर्व
ता ध्रुवयो भवंतु शं नः सिंधवः शमु संत्वापः ॥ शं नो अदितिर्भवतु
व्रतेभिः शं नो भवंतु मरुतः स्वर्काः ॥ शं नो विष्णुः शमु पूषा नो अस्तु
शं नो भवित्रं शम्वस्तु वायुः ॥ शं नो देवः सविता त्रायमाणः शं नो भवं
तूषसो विभातीः ॥ शं नः पर्जन्यो भवतु प्रजाभ्यः शं नः क्षेत्रस्य २८

भाटि

स्पतिरस्तु शंभुः ॥२॥ शं नो देवा विश्वदेवा भवंतु शं सरस्वती
सह धीभिरस्तु ॥ शमभिषाचः शमु रातिषाचः शं नो दिव्याः पा
र्थिवाः शं नो अप्याः ॥ शं नः सत्यस्य पतयो भवंतु शं नो अर्वंतः
शमु संतु गावः ॥ शं न ऋभवः सुकृतः सुहस्ताः शं नो भवंतु
पितरो हवेषु ॥ शं नो अज एकपाद्देवो अस्तु शं नोहिर्बुध्न्यः १ शं
समुद्रः ॥ शं नो अपां नपात्पेरुरस्तु शं नः पृश्निर्भवतु देवगो
पा ॥ आदित्या रुद्रा वसवो जुषंतेदं ब्रह्म क्रियमाणं नवीयः ॥ शृ
ण्वंतु नो दिव्याः पार्थिवासो गोजाता उत ये यज्ञियासः ॥ ये देवा
नां यज्ञिया यज्ञियानां मनोर्यजत्रा अमृता ऋतज्ञाः ॥ ते नो रा

नारा०

२५

संतामुरुगायमयसुयंपातःस्वस्तिभिःसदानः॥ ॐ॥ छ॥ त्यमूषुवा
जिनंदेवजूतंसहावानंतरुतारंरथानां॥ अरिष्टनेमिंपृतनाज्ञ
माशूंस्वस्तयेतार्क्ष्यमिवहाहुवेम॥ इंद्रस्येवरातिमाजुहुवानाः
स्वस्तयेनावमिवारुहेमा॥ उर्वीनपृथ्वीबहुलेगभीरेमावामेतौ
मापरेतौरिषाम॥ सद्यःश्चिद्यःशवसापंचकृष्टीःसूर्यइवज्यो
तिषापस्ततान॥ सहस्रसाःशतसाअस्यरंहिर्नस्मावरंतेयुवति
नशर्यां॥ छ॥ इतिपठेत्॥ छ॥ श्री॥ इतिनांदिश्राद्धप्रयोगःसं
पूर्णः॥ श्री॥ श्रीनमोगोपालाय॥ अथविवाहोत्तरकर्तव्यापिस्था २५
लीपाकप्रयोगउच्यते॥ तत्रागानामुक्तानाम्नन्येपिदेशे

भटि

नप्रोक्ताः॥ सचविवाहानंतरंकर्तव्योपिगृहस्थैर्नसनीयहोमोत्तरभावि
न्यांपौर्णमास्यामारंभणीयः॥ नत्वमावास्यायां॥ यदिचारंभकाले
मलमासगुरुशुक्रास्तबाल्यवार्द्धक्यग्रहणपौषमासादिभवतितत
दापिप्रारंभःकार्यः॥ यानितुतत्रारंभनिषेधकानि॥ उपरागोधिमा
सश्चयदिप्रथमपर्वणि॥ तथामलिम्लुचेपौषेनान्वारंभणमिष्य
ते॥ १॥ गुरुभार्गवयोर्मौढ्येचंद्रसूर्यग्रहेतथेपि घादिनिसंग्रह
कादिचचनमुदाजहार॥ नामकर्मचदर्शश्चियथाकालंसमाच
रेत्॥ अतिपातेसतितयोःप्रत्रास्तमासिपुण्यभेइति॥ छ॥ अ
थपर्वणिनिर्णयः॥ छ॥ पूर्णिमादर्शश्चपर्व०॥ तत्रान्वाधानंप्रति

२६ पष्ठीरित्युत्सर्गः॥ तत्र पर्वचतुर्थांशः प्रतिपदश्चाद्यास्त्रयोंशाः सूर्यो
दयोत्तरमुहूर्तत्रयेपि विद्यमानो यागकालः॥ सूर्यास्तमानपर्यंतं यत्र प
र्वाखंडं तत्र न संदेहः॥ यदि तु खंडपर्व तत्र निर्णयः॥ अन्हो मध्ये त
तः पूर्वं वा पर्वप्रतिपदोः संधौ तद्दिने यागः पूर्वेद्युरन्वाधानं॥ मध्य
परे संधौ तद्दिने अन्वाधानं परेद्युर्याग इति॥ संधिश्च प्रतिपदो ह्रासवृ
द्ध्यारर्द्धं पर्वणि प्रक्षिप्य ज्ञेयः॥ इष्टेः पर्वण्यसमाप्तौ पुनरिष्टिः कर्तव्य
तापत्तेः सा प्रपद्येव समापनीया न पर्वमध्ये॥ अपराह्णसंधौ परे
द्युः प्रतिपच्चतुर्थांशे यागेपि न दोषः॥ चंद्रदर्शनदिने इष्टिनिषेध
श्च नानिर्णिकानि संभवे योज्यानि॥ यातु पौर्णमासी संगवादू २६

र्ध्वमावर्तनात्पूर्वं संधिमती सा सद्यस्काले ति तस्यामन्वाधानं यागश्च
अथ विकृतौ निर्णयः॥ आवर्तनेन ततः पूर्वं वा पर्वसंधौ तद्दिने
ऽव प्रकृतियागं कृत्वा पश्वाद्याग्रयणादिविकृतिः कार्या॥ परसं
धौ तु वीकृतियागएव संधिदिने प्रकृतिस्तु तदुत्तरदिने इति॥
अथ स्थंडिलकरणनिर्णयः॥ तत्र चौलादिहोमो लौकिकाग्नौ
चौलकर्मोपनयनं विवाहः प्रथमस्तथा॥ व्रतानि स्नानमित्ये
षां लौकिकाग्निरिति स्थितिः॥ यद्यपि संभवे तत्र लौकिकाग्नौ
होमे स्थंडिलकरणाग्निप्रतिष्ठापनं तो विधिर्नियतः॥ यद्यपि
समिद्दारावग्निसमारोपस्तदा गृह्याग्नि कर्तव्योपि स्थालीपाकादे

२८ नियतः॥ कारिकाकारः। प्रतिष्ठाप्याथलेखासु होमायाग्निंहविर्भुजं
एतदुक्तंप्रकुर्वीत होष्यन्संस्थापितेनलइति॥ अन्यथासंस्थापितेन
लेहोष्यन्नितियथेस्यादिति॥ एवंस्थंडिलकरणादिविषयंनिर्णीय
यस्थंडिलादिकुर्यात्॥ श्री॥ तत्रयजमानः कृतनित्यक्रियः शु
चिःपरिहितधौतवासाः दर्भपाणिः पीठोपविष्टः प्राङ्मुखो वाग्य
तो द्विराचम्य प्राणानायम्य देशकालौ संकीर्त्य श्रीपरमेश्वरप्री
त्यर्थं॥ अमुककर्मकरिष्ये। तदंगहोमं कर्तुं स्थंडिलादिकरिष्ये
इतिसंकल्प्य॥ गोमयेनोपलिप्ते शुद्धे देशे शुद्धमृदाइरुणान्यार
भमुदक्संस्थं चतुरंगुलमंगुलोन्नतं वा चतुर्दिक्षु मिलित्वा २८

विंशत्यंगुलपरिधिकं फलितमष्टादशांगुलविस्तृतं होमानुसारेण
तदधिकं वा न तु ततो न्यूनं मध्योन्नतं स्थंडिलं कुर्यात्॥ तद्गोम
यनप्रदक्षिणमुपलिप्य॥ दक्षिणेऽथोदीच्यां द्वे प्राच्यामद्वि
मित्यंगुलानित्यका दक्षिणोपक्रमामुदक्संस्थां प्रादेशमात्रा
मेकां लेखां लिखित्वा तस्या दक्षिणोत्तरयोः प्रागायते पूर्वलेखा
या असंस्पृष्टे प्रादेशसंमिते द्वे लेखे लिखित्वा तंस्यांदक्षि॥ त
योर्मध्ये परस्परमसंस्पृष्टा उदक्संस्थाः प्रागायताः प्रादेशसंमि
तास्तिस्र इति षट्लेखायज्ञियत्वक्कुशमूलेन दक्षिणहस्तेनोल्लि
ख्यलेखासु तच्छकलमुदगग्रं निधाय स्थंडिलमद्भिरभ्युक्ष्य

नारा०

२८ शकलमागेन यां निरस्य पाणिं प्रक्षाल्य याम्यतो भवेत्॥ छेदने भेदने
चैवेपे तत्केरौद्रराक्षसे॥ आत्माभिमर्शने चैव निरस्याप स्पृशे
त्॥ तैजसादिपात्रेपिधानसहितमग्निमानीय स्थंडिले लादाग्ने
यां दिशि निधाय॥ जुष्टो दमूना आत्रेयो वसुश्रुतो ऽग्निस्त्रिष्टुप्॥
अग्न्यावाहने विनियोगः॥ ॐ॥ जुष्टो दमूना ऽअतिथिर्दुरोण
इमन्नो यज्ञमुपयाहि विद्वान्॥ विश्वा ऽअग्ने ऽअभियुजो विहत्य
शत्रुयतामाभरभोजनानि॥ एह्यग्ने राहुगणो गौतमो ऽग्नि
स्त्रिष्टुप्॥ अग्न्यावाहने विनियोगः॥ ॐ एह्यग्न इह होता निषीदा
दब्धः सुपुर एता भवा नः॥ आवतां त्वा रोदसी विश्वमिन्वेयजा २८

भरि

महे सौमनसाय देवान्॥ इत्यक्षतैरावाह्या ऽच्छादनं दूरीकृत्य॥ स
मस्तव्याहृतीनां परमेष्ठी प्रजापतिर्बृहती ऽअग्निप्रतिष्ठापने विनि
योगः॥ ॐ भूर्भुवः स्वरोऽमुकनामाग्निं प्रतिष्ठापय्य॥ चत्वारि
शृंगेति वामदेवो ऽग्निस्त्रिष्टुप्॥ अग्निमूर्तिध्याने विनियोगः॥ ॐ
चत्वारि शृंगा त्रयो ऽअस्य पादा द्वेशीर्षे सप्तहस्तासो ऽअस्य॥
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ ऽआविवेश॥ सप्तह
स्तः श्चतुः शृंगः सप्तजिह्वो द्विशीर्षकः॥ त्रिपात्प्रसन्नवदनः सुखा
सीनः शुचिस्मितः॥ स्वाहां तु दक्षिणे पार्श्वे देवीं वामे स्वधां तथा॥
बिभ्रद्दक्षिणहस्तैस्तु शक्तिमन्नं स्रुचं स्रुवं॥ तोमरं व्यजनं वामे

नारा॰

२९ घृतपात्रं च धारयन्॥ मेषारूढो जटाबद्धो गौरवर्णो महोजसः॥
स्वाहां तु दक्षिणपार्श्वे देवी वामे स्वधां तथा बिभ्र आत्माभिमुखमा
सीन एवंरूपो हुताशनः॥ एष हि देवः प्रदिशोऽनु सर्वाः पूर्वो हि जा
तः स उ गर्भे ऽअंतः॥ स वी जायमानः स जनिष्यमानः सो मनस्यमानः
प्रत्यङ्मुखो विश्वतोमुखः॥ अग्नये वैश्वानर शांडिल्य गोत्र
मेषध्वज प्राङ्मुखो मम सन्मुखो भव॥ ततो यदि समिद्धोऽसमा
रोपितोऽग्निस्तर्हि प्रत्यवरोहणं कार्यं॥ प्रत्यवरोहेत्यस्य मंत्र
स्य हिरण्यगर्भोऽग्निस्त्रिष्टुप् प्रत्यवरोहणे विनियोगः॥ ॐ प्रत्यव २९
रोह जातवेदः पुनस्त्वं देवेभ्यो हव्यं वह नः प्रजानन्॥ प्रजां पुष्टिं भ॰टि

रयिमस्मासु धेह्यथा भवं यजमानाय शं योः॥ इति मंत्रेण समारोपिताग्नि
समिधं स्थापितेऽग्नौ प्रक्षिपेत्॥ अथ स्थालीपाकप्रयोगः॥ गृहप्रवेशी
य होमात् प्राक् पौर्णमास्यागमिष्यते॥ तस्यां तं प्रारभेतेति वृत्तिकारादिभाषि
तं॥ आग्नत्रेऽपासनं हुत्वा समिधौ द्वे निधाय च॥ अथवातिस्वप्नेऽआद
ध्यात्तु ऋतु संकल्पपूर्वकं॥ सद्यस्काले भवेद्यद्वा पौर्णमास्यास्तु पा
र्वणः॥ तत्र आचम्य प्राणानायम्य देशकालौ संकीर्त्य मम उपात्तदुरि
तक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं दर्शपौर्णमासाभ्यां स्थालीपाकाभ्यां
अहं यक्ष्ये॥ तत्रेदानीं पौर्णमासेन स्थालीपाकेन यक्ष्ये॥ दर्शे तु पूर्वसं
कल्पितेन दर्शस्थालीपाकेन यक्ष्ये॥ तदंगमन्वाधानं करिष्ये॥ अ

३० स्मिन्नन्वाहिते ऽग्नौ ज्ञातवेदसमग्निमिध्मेन प्रजापतिं प्रजापतिं वा घारदे
वते ऽ आज्येनाग्नीषोमौ चक्षुषी आज्येनात्र प्रधानं ॥ अग्निम् ॥ अग्नीषो
मौ प्रधानदेवते चरुद्रव्येण ॥ दर्शे दर्शे अग्निमिंद्राग्नी च प्रधानदेवते
चरुद्रव्येणेति विशेषः ॥ शेषे एस्विष्टकृतमग्निमिध्मसन्नहनेन रुद्रम
यासमग्निं देवानू विष्णुमग्निं वायुं सूर्यं प्रजापतिं च ॥ एताः प्रायश्चित्त दे
वता आज्येन ज्ञाताज्ञात दोषनिबर्हणार्थं त्रिचारमग्निं मरुतश्चाज्येनां
ग देवताः प्रधानदेवताः सर्वाः संन्निहिताः संतु ऽ एवं सांगोपांग न कर्मणा
सद्योयक्ष्ये ॥ सद्यस्काले तु सद्योयक्ष्ये ॥ तूष्णीं समस्त व्याहृतिभिर्वा स
मिद्धोमं कुर्यात् ॥ इध्माबर्हिषोश्च सन्नहनं रुत्त्वोपरि निदध्यात् ॥ तदि ३०

नेकलहक्रयविक्रयप्रहासानृतबहुभाषणचौर्यादिव्यसनपर्यंक
शयनदंतधावनकरंभकुलत्थकोद्रवचनकमसुरवंताकक्षारलवण
कोरदूषकमधुमाषमांसमद्यपरान्नोपवासतैलमैथुनानि वर्जयंनी
दधिघृतपयोमिश्रीतं हविष्यान्नं दिवैव संकृत् भुंजीयातां ॥ श्राद्धकर्तुं
श्राद्धशेषं माषापायसं भुंजत ॥ ततः पर्वप्रतिपदि प्रातरौपासनं हुत्वा
अग्निं परिसमुह्य परिस्तरणीयात् ॥ तच्च ह्य ॥ अग्नेः शोडशभिर्दर्भैः
प्राच्यादिषु परिस्तृतिः ॥ युग्मैर्वा दिशमात्रैश्च पूर्वाग्रैः सर्वदिक्ष्वपि
॥ कांश्चिदुत्तरतो दर्भानास्तीर्य परिषिंचंति ॥ दर्भेष्वुत्तरतो द्वेद्वे पा
त्राणि न्यंचि सादयेत् ॥ तत्क्रमं भगवानाहश्लोकेनैकेन यतिरुः

३१ त् ॥ दर्भेषु दक्षिणसव्यपाणिभ्यां क्रमेण चरुस्थाल्यौ प्रोक्षण्यौ दर्वीस्रुवौ
प्रणीताऽज्यपात्रे इध्मा बर्हिषि ॥ शूर्पकृष्णाजिनउलूखलमुसलं चेति
॥ द्वेद्वे उदगपवर्गं शाकसंस्थान्यु [illegible] आन्यासादयेत् ॥ आज्यमात्रहो
मे तु प्रोक्षणीस्रुवौ प्रणीता आज्यपात्रे इध्मा बर्हिषी च तथा कुर्यात्
प्रोक्षणीपात्रमुत्तानं कृत्वा ॥ प्रादेशमात्रे द्वे पवित्रे निधाय अद्भिः
पूरयित्वाऽङ्गुष्ठोपकनिष्ठिकाभ्यां त्रिरुत्पूय ॥ पात्राण्युत्ताना
नि कृत्वा ॥ इध्मं च विस्रस्य सर्वाणि पात्राणि त्रिः प्रोक्षयेत् ॥ प्रणी
ता पात्रमग्नेः प्रत्यङ् निधाय तत्र पवित्रे निधायोदकं पूरयित्वा गंधपुष्पा ३१
क्षतान्निक्षिप्य अस्मिन्कर्मणि ब्रह्मत्वेन त्वामहं वृणे इति मंत्रेण प

पाणिना पाणिं स्पृष्ट्वा ॥ ततो ब्रह्मा वृतोऽस्मीत्युक्त्वा ॥ आचम्य समस्तपा
ण्यंगुष्ठे भूत्वा अग्नेर्दक्षिणतस्तृणं निरस्तः परावसुरिति तृ
णं गृहीत्वा निर्ऋत्यां निरस्याप उपस्पृश्य इदमहमर्वाग्वसोः सदने सी
दामीत्युक्त्वोपविशेत् ॥ ॐ बृहस्पतिर्ब्रह्मा ब्रह्मसद [illegible] आसिष्य
ते बृहस्पते यज्ञं गोपायेत्युपविश्य जपेत् ॥ ब्रह्मन्नपः प्रणेष्यामीति पृ
ष्टा ॥ ततो ब्रह्मा भूर्भुवः स्व बृहस्पतिप्रसूत इति जपित्वा ॥ ॐ प्रण
येत्युच्चैर्वदेत् ॥ निरसनोपवेशनं तथा ब्रह्मा जपोऽपि च ॥ प्रायश्चि
त्तमुपस्थानं ब्रह्मणः कर्मपंचकं ॥ इति ब्रह्मा भवेत् ॥ ततो यजमानः
तत्प्रणीतापात्रं नासिकासमीपे नीत्वा ॥ उत्तरतोऽग्नेर्निधाय दर्भैरा

३२

रक्षार्द्दयेत् ॥ तेपवित्रे शूर्पे निधायाऽग्नये त्वा जुष्टं निर्वपामीति मं
त्रावृत्त्या व्रीहीणां चतुरो मुष्टीन् निरूप्याग्नीषोमाभ्यां त्वा जुष्टं
निर्वपामीति तथैव निरूप्य ते पवित्रे व्रीहीणामुपरि निधायोत्पूता
भिरद्भिरग्नये त्वा जुष्टं प्रोक्षामीति निर्वापसंख्य प्रोक्षयेत् ॥ एव
मग्नीषोमाभ्यां प्रोक्षयेदिति ॥ दर्शे तु अग्नीषोमस्थाने इन्द्राग्निभ्यां
स्यादि निर्वापप्रोक्षणे च विशेषः ॥ एवं नाममंत्रकहोमे निर्वापः प्रोक्ष
णं च ॥ यथाप्रधानं देवतं देवतानामग्रहणेन कार्यं ॥ समंत्रकहोमे तु
वणाकर्मादौ तूष्णीं चतुरश्चतुरो मुष्टीन् निर्वपेत् प्रोक्षेच्च ॥ ततः ३२
प्रत्यगग्रं वंशुर्ध्वं लोमकृष्णाजिनं निधाय तदुपरि उलूखलं निधाय

भिटि

व्रीहीनोप्य पत्न्या तंडुलान् त्रिः शुक्लीकुर्यात् त्रिः प्रक्षाल्याऽग्नौ श्रपयेत् ॥ त
तः परिस्तरणाद्बहिरुत्तरतो अंगारानपोह्य तदुपरि आज्यपात्रं निधाय
विलीनाज्यं निक्षिप्य वामेदर्भाग्रद्वयं धृत्वा एनोत्स्रुकेनाचन्वा ह्य रभी
भाग्रद्वयं निक्षिप्योत्स्रुकेन चरुणा सहितं त्रिः पर्यग्निकरणं कुर्यात् ॥ उत्स्रु
कं निरस्याग्नाएनग्नौ निक्षिपेत् ॥ अंगुष्ठोपकनिष्ठिकाभ्यां पाणिभ्यां प
वित्रे गृहीत्वा सवितुष्ट्वेति मंत्रस्य हिरण्यस्तूप ऋषिः ॥ सविता देवता
॥ पुरउष्णिक् छंदः ॥ आज्यस्योत्पवने विनियोगः ॥ ॐ सवितुष्ट्वा प्रसव
उत्पुनाम्यच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः ॥ सकृन्मंत्रेण द्विस्तूष्णीं
तपवित्रेऽद्भिः प्रोक्ष्याग्नौ प्रहरेत् ॥ तूष्णीं स्वधायस्वाहा दायइदं ॥ ततो

नारा०

३२

बर्हिरास्तरणं तदुपरि आज्यस्थापनं दक्षिणहस्तेन स्रुक्स्रुवौ गृहीत्वास
व्येन कांश्चिद्दर्भानादाय संहे वाग्नौ प्रताप्य दर्वीं निधाय स्रुवं वामहस्ते गृही
त्वा स्रुवबिलं दर्भाग्रेण त्रिः संमृज्य तथैव स्रुचपृष्ठं दर्भाग्रेणऽऽत्माभि
मुखं त्रिः संमृज्य कुशमूलेन पृष्ठादारभ्य बिलपर्यंतं त्रिस्त्रिः संमृज्याग्रे
स्य प्रताप्य घृतादुत्तरतः स्थापयेत् ॥ पुनस्तथैव स्रुचिं संमृज्याग्रेस्य प्रता
प्य घृतादुत्तरतः स्थापयेत् ॥ संमृजनदर्भानभ्युक्ष्याग्नौ प्रहरेत् ॥ स्रुवेणाज्यं ग
हीत्वा चरुमभिघार्योदगुद्वास्याग्न्याज्ययोर्मध्येन स्थाप्यादक्षिणतो ब
र्हिषि संस्तरमासाद्य पुनस्तथैव ॥ तन्मध्ये एकं पात्रं निधायाग्निम
लंकृत्य ॥ विश्वानि न इति तिसृणां ऽ आत्रेयो वसुश्रुतो ऽग्निस्त्रिष्टु ३२। भिटि

प् ॥ द्वाभ्यामर्चने त्योपस्थाने विनियोगः ॥ ॐ विश्वानि नो दुर्गहा जातवे
दः सिंधुन्न नावा दुरितातिपर्षि ॥ अग्ने अत्रिवन्नमसा गृणानो ऽ
स्माकं बोध्यविता तनूनां ॥ यस्त्वा हृदा कीरिणा मन्यमानोऽमर्त्यं
मर्त्यो जोहवीमि ॥ जातवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृ
तत्वमश्यां ॥ यस्मै त्वं सुकृते जातवेद उ लोकमग्ने कृणवः स्योनं
॥ अश्विनं स पुत्रिणं वीरवंतं गोमंतं रयिं नशते स्वस्ति ॥ अग्निं
गंधपुष्पादिभिरायतनमलंकृत्य एकया परिस्तीर्य ॥ ततो पाणिने
ध्ममादायाभिघार्य ॥ अयं त इध्म इत्यस्य मंत्रस्य वामदेव ऋषिः जा
तवेदाग्निर्देवता ॥ १ऋ त्रिष्टुप् छंदः ॥ इध्माहवने विनियोगः ॥ अयं त

नारा०

३४ इध्म आमा जा न वेदस्तेनेध्मस्व वर्धस्व चेद्ध वर्द्धय चास्मान् प्रजया पशुभिर्ब्रह्म
वर्चसेनान्नाद्येन समेधय स्वाहा॥ अग्नये जातवेदस इदं॥ स्रुवेणाज्यं गृही
त्वा॥ वायव्य दिशि मारभ्याग्नेय पर्यन्तं आज्यधारां ऋजुं हरेत्॥ प्रजापति
मनसाध्यायन् स्वाहेति जुहुयात्॥ स्वाहेति मुखेन स्मृत्वा तथैव निरृ
ती दिशि मारभ्य ईशानी दिशि पर्यन्तं जुहुयात्॥ उभयत्र प्रजापतय
इदं॥ अग्नये स्वाहा॥ अग्नेरुत्तरतः सौमाय स्वाहेति दक्षिणतः॥ अ
ग्नय इदं॥ सोमायेदं न मम॥ चरोर्द्धृत्य॥ इदमग्नये॥ इदमग्नि
षोमाभ्यां॥ इत्यभिमृश्य॥ दर्व्यामुपस्तीर्य चरुस्थाल्यां गुष्टपर्व
मात्रं मध्यात् गृहीत्वा॥ दर्व्यामोप्य तथैव पूर्वार्द्धात् गृहीत्वा ३५

भटि

ओप्य पंचावत्तीचेत्पश्चार्द्धात् गृहीत्वा चरुमभिघार्यावत्तमभिघारयेत्॥ पंचाव
त्तिनस्तु जामदग्न्यावत्सविदार्ष्टिषेणास्तथैव च भार्गवाश्चायना और्वः
पंचावत्तिन इत्तिरिताः स्रुचिपार्श्वेन अग्नये स्वाहा अग्नय इदं० तथैव पाश्चा
त्तरगृहीत्वा अग्नीषोमाभ्यां स्वाहा अग्नीषोमाभ्यामिदं० इन्द्रोक्तु अग्नीषो
मस्थाने इन्द्राग्निभ्यां स्वाहेति विशेषः त्यागस्तथैव प्राक्संस्थमुदक्संस्थं वाहुत्वा
पुनर्दर्व्यामुपस्तीर्य चरोरुत्तरार्द्धात् सकृत्सकृत् गृहीत्वा दर्व्यामोप्य पंचावत्ति
ती तु हविर्भाग द्वयमपि उत्तरार्द्धात् पूर्वार्द्धाच्च द्विर्द्विरवदाय [illegible]मपात्रस्थ
मभिघार्य अवत्तं तु द्विरभिघार्य यदस्य कर्मण इत्यस्य मंत्रस्य हिरण्यगर्भ ऋ
षिः अग्निस्विष्टकृन्नो देवता अतिधृती छंदः स्विष्टकृद्धोमे विनि

नियोगः ॐ यदस्य कर्मणोत्यरीरिचं यद्वा न्यूनमिहाकरं अग्निष्टत्स्विष्टकृद्विद्वा
न्सर्वं स्विष्टं सुहुतं करोतु मे अग्नये स्विष्टकृते सुहुतहुते सर्वप्रायश्चित्ताहुती
नां कामानां समर्द्धयित्रे सर्वान्नः कामान्समर्द्धय स्वाहा अग्नये स्विष्टकृत
इदं॰ त्रिसंधानं विसृज्य प्रोक्ष्य ॐ रुद्राय पशुपतये स्वाहा रुद्राय पशुप
तय इदं अप उपस्पृश्य स्रुवेण प्रायश्चित्ताहुतीः सप्त जुहुयात् तत्र मंत्रः
आयाश्चेत्यस्य मंत्रस्य विमद ऋषिः आयाग्निर्देवता पङ्क्तीछंदः प्रायश्चि
त्ताज्याहुतिहोमे विनियोगः आयाश्चाग्नेस्यनभिशस्तीश्च सत्यमित्वमया अ
सि अयासा वयसा कृतो यासन् हव्यमूहिषे या नो धेहि भेषजं स्वाहा अग्न
ये अयस इदं न॰ अतो देवा इति द्वयोः काण्वो मेधातिथिरृषिः अग्ना

देवता द्वितीया विष्णुर्देवता गायत्रीछंदः प्रायश्चित्ताज्याहुतिहोमे वि॰
ॐ अतो देवा अवंतु नो यतो विष्णुर्विचक्रमे पृथिव्याः सप्तधाम
भिः स्वाहा देवेभ्य इदं॰ ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं
समूढमस्य पांसुरे स्वाहा विष्णव इदं॰ व्यस्तसमस्तव्याहृती
नां विश्वामित्र जमदग्नि भरद्वाज प्रजापतय ऋषयः अग्निर्वा
युः सूर्य प्रजापतयो देवता गायत्र्युष्णिगनुष्टुप् बृहत्यश्छंदांसि
प्रायश्चित्ताज्य॰ ॐ भूः स्वाहा अग्नय इदं॰ ॐ भुवः स्वा
हा वायव इदं॰ ॐ स्वः स्वाहा सूर्याय इदं॰ ॐ भूर्भुवः
स्वः स्वाहा प्रजापतय इदं॰ ततो ब्रह्मा कर्तारं परित्यागेन वा

३६ पश्चाद्देवेष्टिष्ट्वेता एव सप्ताहुतीर्जुहुयात् त्यागस्तु यजमानो
ऽत्र कुर्यात् अनाज्ञातमिति मंत्रद्वयस्य हिरण्यगर्भ ऋषिः अ
ग्निर्देवता त्रिष्टुप्छंदः ज्ञाताज्ञातदोषपरिहारार्थे प्राय० अना
ज्ञातं यदाज्ञातं यज्ञस्य क्रियते मिथु अग्ने तदस्य कल्पय त्वंहि वे
त्थ यथातथं स्वाहा पुरुषसंमितो यज्ञो यज्ञः पुरुषसंमितः अ
ग्ने तदस्य कल्पय त्वंहि वेत्थ यथातथं स्वाहा ॐ यत्पाकत्रा
मनसा दीनदक्षेत्यस्य मंत्रस्य अप्रास्विन ऋषिः अग्निर्देवता त्रि
ष्टुप्छंदः न्यूनातिरिक्तपूर्णार्थं प्रायश्चित्ता० यत्पाकत्रा मन
सा दीनदक्षा न यज्ञस्य मन्वते मर्त्यासः अग्निष्टद्धोता क्रतुविद्वि ३६

द्वान् यजिष्ठो देवाँ ऋतुशो यजाति स्वाहा अग्नय इदं० यद्वो देवा इत्यस्य
मंत्रस्य ऽअभितपा ऋषिः इमरुद्देवता त्रिष्टुप्छंदः मंत्रतंत्रविपर्या
दिनिमित्तक ऽआज्य० ॐ यद्वो देवा अतिपातयानि वाचा च प्रयुती दे
वहेडनं अरायो अस्माँ अभिदुच्छुनायते ऽन्यत्रास्मन्मरुतस्तन्नि
धेतन स्वाहा ॥ मरुद्भ्य इदं० सर्वप्रायश्चित्तं करिष्ये ॥ भूर्भुवः स्वः स्वाहा ईदं० ॥ वि
श्वेभ्यो देवेभ्यः स्वाहा देवेभ्य इदं० ॥ बर्हिषि पूर्णपात्रं निनयन् पूर्णमसि पू
र्णं मे भूयाः सुपूर्णमसि सुपूर्णं मे भूयाः सदसि सन्मे भूयाः सर्वमसि सर्वं मे भू
याः अक्षितिरसि मामेक्षेष्ठाः प्राच्यां दिशि देवा ऋत्विजो मार्जयंतां दक्षिण
स्यां दिशि मासाः पितरो मार्जयंतां प्रतीच्यां दिशि गृहाः पशवो मार्जयंतां

३७ उदीच्यां दिस्यापः ओषधयो वनस्पतयो मा र्जयंतां ऊर्ध्वायां दिशिय
ज्ञः संवत्सरः प्रजापतिर्मार्जयंतां अपो अस्मान्मातरः शुंधयंतुः
घृतेन नो घृतप्वः पुनंतु विश्वंहि रिप्रं प्रवहंति देवीरुदिदाभ्यः शुचि
रापूत एमि इदमापः प्रवहत यत्किंच दुरितं मयि यद्वाहमभिदुद्रो
ह यद्वासेपउतानृतं सुमित्र्यानऽआप ओषधयः संतु दुर्मित्र्यास्त
स्मैसंतुयोस्मान्द्वेष्टि यंचवयंद्विष्मः इत्येतैर्मंत्रैर्मार्जनं कृत्वा तेहऽ
न्निति निऋति दिशि कुशाग्रैरपः सिंचेत् माहं प्रजां परासिचयानः स
यावरी स्थना समुद्रे वोनिनयानि स्वं पाथो अपीथा आसेयाहि सि
मुखासिद्धन् ॐ चमसस्वरः श्रमेय ज्ञोपच्चते नमश्चा पत्तेन्यूनंतस्मै ३५

तउपयंतेऽअतिरिक्तं तस्मैते नमः अग्नयेनमः स्वस्ति श्रद्धां मेधा
यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलंऽ आयुष्यं तेजऽ आरोग्यं देहि मे हव्य
वाहनोंनमोनमः मानस्तोकेति मंत्रस्य कुत्स ऋषिः रुद्रो देवता
जगतीछंदः विभूतिग्रहणे विनियोगः ॐ मानस्तोके तनये मा
न आयौषि मानो गोषु मानो अश्वेषु रीरिषः वीरान्मानो रुद्र भा
मितो वधीर्हविष्मंतः सदमित्वा हवामहे त्र्यायुषं जमदग्नेः क
श्यपस्य त्र्यायुषं अगस्त्यस्य त्र्यायुषं यद्देवानां त्र्यायुषं तन्मे अस्तुऽ
त्र्यायुषं यथास्थानं विभूति धारणं कुर्यात कर्त्ता परिस्तरणानु
न्युत्तरे विसर्जस्य पवित्रसमुह्य पर्युक्ष्य हविरुच्छिष्टं ब्रह्मणे तदः

३८ भावे ब्राह्मणेभ्यो दातुमहमुत्सृजे॥ अनेन पौर्णमासस्थालीपाकेन क
र्मणा श्रीपरमेश्वरः प्रीयतां न मम यस्य स्मृत्या च नामोक्त्या तपोय
ज्ञक्रियादिषु न्यूनं संपुर्णतां याति सद्यो वंदे तमच्युतम् प्रमादा
त्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् स्मरणादेव तद्विष्णोः संपूर्णं
स्यादिति श्रुतिः प्रायश्चित्तान्यनेकानि तपःकर्मात्मकानि वै या
नि तेषामशेषाणां कृष्णानुस्मरणं परं ॐ तत्सद्ब्रह्मार्पणमस्तु
श्री इति स्थालीपाकप्रयोगः संपूर्णः छ छ छ श्रीगोपा
लो जयतु श्री अथ प्रायश्चित्तानि तत्पथिकृत्प्रविशा
यां यद्वि विष्टिः समाप्यते पुनः प्रणीयक्षेष्टिः कर्तव्या यागवित्त ३८

मैः प्रमादादन्याग्नौ चेत्स्वयं यजेत् तस्याग्नावन्यो वा जुहुयेत्तदा
प्रायश्चित्तं पथिकृच्चरुसहोमं कृत्वा पुनस्तृणीयादिति तिथिषु आन्वाधा
नपूर्वकमिष्टिं कुर्यात् छ अथार्तिपन्नेष्टिप्रयोगः आन्वाधान
पूर्वं चेत्स्त्री रजस्वला भवति तदा पंचमाहि दिवसे सद्यस्कालान्वा
धानपूर्वकं जुहुयात् अन्वाधानात्परतो रजस्वला चेत्तां गृ
हान्तरे स्थापयित्वा प्रतिपद्येव जुहुयात् सूतकादिने ष्टीनतीं
तां चेदागामिपर्वपूर्वतिथिषु हूतीयां चतुर्थीं नवमीं चतुर्दशीं
विसृष्टायामन्यासु तामार्तिपन्नेष्टिं कुर्यात् तास्वप्यतिक्रमे अनंत
रे पर्वणि पथिकृद्यागपूर्वकमपन्नयागं कृत्वा तत्पर्वणोऽन्वाधा

३९ नंकुर्यादिति अथ चंद्रग्रहे शौनक आह तद्यथा ईष्टिदिने [illegible]ती
हविरासादनांतं कृत्ते अन्वाधाने इष्टिमध्ये चंद्रग्रहेण जनितवैगुण्यपरि-
हारार्थं शौनोक्तामाज्याहुतीमुपस्थानं च करिष्ये इति संकल्प्य अत्राह
गोरत्यस्य राहुगणो गौतमश्चंद्रमा गायत्री इष्टिमध्ये चंद्रग्रहणवैगुण्य
परिहारार्थं आज्यहोमे विनियोगः ॐ अत्राहगोरमन्वत नाम त्वष्टुरपी
च्यं इत्था चंद्रमसो गृहे स्वाहा चंद्रमस इदं न मम नवोनव इत्यस्य मंत्र-
स्य सूर्यासावित्री चंद्रमास्त्रिष्टुप् चंद्रोपस्थाने विनियोगः ॐ नवोनवो भ
वति जायमानोऽह्नां केतुरुषसामेत्यग्रं भागं देवेभ्यो विदधात्यायन्प्रचं
द्रमास्तिरते दीर्घमायुः सूर्यग्रहे तु संकल्पादौ चंद्रपदस्थाने सूर्यपदं प्रयो ३९

ज्यं उद्वयमित्यस्याः प्रस्कण्वः सूर्योनुष्टुप् आज्यहोमे विनियोगः ॐ
उद्वयं तमसस्परि ज्योतिष्पश्यंत उत्तरं देवं देवत्रा सूर्यमगन्म ज्योतिरुत्त
मं स्वाहा सूर्याय इदं० चित्रमित्यस्य कुत्सः सूर्यस्त्रिष्टुप् सूर्योपस्थाने वि
नियोगः चित्रं देवानामित्यादि वर्गद्वयोपठित्वा श्री इति इष्टिमध्यग्र
हणनिर्णयः अथाग्न्यनुगमप्रायश्चित्तविधिः नमः श्रीगोपा
लाय आचम्य प्राणानायम्य देशकालौ संकीर्त्य अनुगताग्निप्रायश्चित्तं करि
ष्ये उपलेपादि श्रोत्रियागारात् स्वगृहाद्वा अग्निं प्रतिष्ठाप्याज्योत्पवना
दि कृत्वा आयाश्चेति मंत्रस्य विमद ऋषिः आयाश्चाग्निर्देवता पंक्ति
श्छंदः अनुगताग्निप्रायश्चित्तहोमे विनियोगः ॐ अयाश्चाग्ने०

४० अग्नये अयस इदं० ॐ भूर्भुवःस्वः स्वाहा प्रजापतय इदं० सायंप्रात
र्होमं कुर्यात् इति अनुगताग्निप्रायश्चित्तं अथ प्रसंगात् अन्यैव नै
मित्तिकप्रायश्चित्तान्युच्यंते तत्र कारिका अर्वाक्त्र्याम्यापरासात्तु ब
हिरायतनाद्धुतं प्रायश्चित्तसमाप्त्यंतं समयोज्जीवितं यदि इदं तदस्य
चात् तस्य स्थानेऽग्निं प्रक्षिपेत्पुनः आज्याहुतीश्च जुहुयात् व्याहृ
त्यास्त्वेवं श्चै पूर्ववत् त्र्याम्याः द्विघ्नांगुल्लेत्याग स्तबः तदुक्तं कारिकायां
अतिक्रांते परान्न्याम्यापरासमनलो भवेत् चरुः पथिकृतः कार्यः पू
र्णाहुतिमथापि वा पूर्णाहुतिलक्षणं कारिकायामुक्तं आज्यं द्वादश
कृत्वस्स्रुग्गृहीत्वा पूरयेत्स्रुचं तया त्वाहुतिः कार्या सा पूर्णाहुतिरिष्यते ४०